नाट्यकारो नितरामपमानितस्य दुर्योधनस्य प्रायोपवेशनं नाटयति। सर्वे सङ्कल्पाद् वारयन्ति। दुःशासनो वदति- "आर्य नैवं, यदि भवान् स्वीयसङ्कल्पान्न विरमति, तर्हि वयमपि भवन्तमनुसरामः। न च वयं राजधानीं गच्छामः, सर्वे च नारीजना न गमिष्यन्ति हस्तिनाम्।"(पृ.54)। अन्ततः प्रायोपवेशनसङ्कल्पं त्यक्त्वा भरतवाक्यमुच्चार्य जगतो मङ्गलं कामयते दुर्योधनः।

सर्वे सन्तु निरामया वसुमती सम्पन्नशस्यास्तु नो
लोकाः स्युः सुखिनोऽत्र सर्वविषये सन्तश्च सम्मानिताः।
आस्तां संस्कृतभारती सुमधुरा विद्यार्थिभिः सेविता
विश्वेशस्य पदाम्बुजेऽपि सततं भृङ्गायतां मन्मनः॥(पृ.५६)।

### १.१.२७. श्रीजीवन्यायतीर्थः(१८९३)

कियन्ति रत्नानि लसन्ति सिन्धोरन्तर्जले लोकदृगन्तराले।
कियन्ति पुष्पाणि वितीर्य गन्धं रहो विनश्यन्ति वनस्थलीषु॥

इति उक्तिं सफलीकुर्वन्निव पण्डितपञ्चाननतर्करत्नस्य सुयोग्यः पुत्रः श्रीजीवन्यायतीर्थः संस्कृतसाहित्ये एकमविस्मृतं नाम, सारस्वतसाधनायाः कामपि उच्चतमां कोटिमाटीकमानम्। आसीत्स काव्यव्याकरणन्यायतीर्थः। कलिकाताविश्वविद्यालयेन तथा वर्धमानविश्वविद्यालयेन एषः १९७२ क्रैस्ताब्दे डि.लिट्. इत्युपाधिना सम्मानितः, १९६८ क्रैस्ताब्दे राष्ट्रपतिपुरस्कारेण भूषितः। प्रयागविद्वत्सङ्गोष्ठीतो 'महामहिमोपाध्यायः', नवद्वीपतो 'व्याकरणशिरोमणिः', हाओडापण्डितसङ्गोष्ठीतो 'महाकविः', विश्वभारतीविश्वविद्यालयतो 'देशिकोत्तमः', उत्तरप्रदेशसंस्कृताकादमीतः 'संस्कृतभारती', सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतो 'महामहोपाध्याय'- इत्यादिभिरुपाधिभूषणैरेष भूषितः।

कालिदासादिवदेषोऽपि सरस्वतीवरपुत्र आसीत्। सारस्वतसाधनायाः सत्फलरूपेण विलसन्ति बहूनि श्रव्यकाव्यानि, दृश्यकाव्यानि च एतेन रचितानि। विशेषत एवमेव वक्तव्यं यत् संस्कृतसाहित्यस्य तादृशः कोऽपि अंशो नासीद्यत्र तस्य लेखनी न गतासीत्। प्रबन्धः, रम्यरचना, प्रशस्तिगाथा, शोकगीतिः, अनूदितकाव्यं चेत्यादयो बहुविधविषयास्तत्र सन्निविष्टाः। १९२६ ईसवीयसंवत्सरे कवेरस्य प्रथमप्रकाशनं जातम्, अन्तिमप्रकाशनञ्च १९८५ ईसवीयसंवत्सरे जातम्। महाकवेरस्य षष्टिवर्षपरिव्याप्तं रचनाविश्वमेवमस्ति-

★ श्रव्यकाव्यानि- १.पाण्डवविक्रमम्(१८सर्गात्मकमहाकाव्यम्),

२.सारस्वतशतकम् (चित्रकाव्यम), ३.ऋतुचक्रचक्रमणम् (गीतिकाव्यम)

★ दृश्यकाव्यानि-

i. नाटकानि- १.महाकविकालिदासम् , २.साम्यसागरकल्लोलम् , ३.श्रीशङ्कराचार्यवैभवम् , ४.नागनिस्तारम् , ५.स्वातन्त्र्यसन्धिक्षणम् , ६.विवेकानन्दचरितम् , ७.निगमानन्दचरितम् , ८.सिन्धुसौवीर-सङ्ग्रामम् , ९.श्रीकृष्णकौतुकम् , १०.रघुवंशम् , ११.कुमारसम्भवम्

ii. प्रकरणम्- १.माधुरीसुन्दरम्

iii. भाणम्- १.विधिविपर्यासम् , २.पुरुषपुङ्गवः

iv. व्यायोगः- १.कैलासनाथविजयम् , २.गिरिधरसंवर्द्धनम्

v. प्रहसनम्- १.विवाहविडम्बनम् , २.चण्डताण्डवम् , ३.भट्टसङ्कटम् , ४.पुरुषरमणीयम् , ५.क्षुत्क्षेमीयम् , ६.शतवार्षिकम् , ७.चिपिटक-चर्वणम् , ८.रागविरागम् , ९.वनभोजनम् , १०.रामनामदातव्य-चिकित्सालयम् , ११.दरिद्रदुर्दैवम् , १२.चौर-चातुरीयम् , १३.नष्टहासम्।

पाण्डवविक्रमम्-अष्टादशसर्गात्मके महाकाव्ये महाभारतस्य विराटपर्वणः कथावस्तु विशिष्य पाण्डवानामज्ञातवासस्य वीरत्वगाथा वर्णिता। महाकाव्यस्यास्य कथाजालं महाभारतस्य वनपर्वणि अपि प्राप्तुं शक्यते। विशेषतः तत एवास्य समारम्भः। महाभारतीयकथाजातमुपजीव्य काव्यस्यास्य रचना। महाकाव्येऽस्मिन् सामान्यतः सार्धैकसहस्रं श्लोकाः सन्ति। पाण्डवानां वीरगाथा यत्र मुख्यस्थानं लेभे तत्र तु वीररस एव अङ्गीरसः स्यादेव। अङ्गरसत्वेन शान्तरसस्य विन्यासो जातस्तत्र। महाभारतीयं किरातार्जुनीयम्, रामायणीयमुत्तररामचरितम्, वङ्गभाषायां मेघनादवधकाव्यमपि परिकरबद्धाश्रितं काव्यम्। तथैव श्रीजीवन्यायतीर्थाचार्यस्य पाण्डवविक्रममहाकाव्यमप्यभिनवपरिकरबद्धाश्रितं महाकाव्यम्।

यद्वा भवतु, काव्यरचनया केवलं ज्ञाताज्ञातविषयाणामेव ज्ञानं न भवति अपि तु, रचयितुः जीवनदर्शनमपि प्रतिविम्वितं भवति तस्मिन्। अस्मिन्नेव काव्ये दृश्यते यन् मानवजीवने विभिन्नविषयाणामनुभवो भवति- उदाहरणरूपेण

पाण्डवानां जीवनचित्रं कल्पयितुं शक्यते। राजपुत्राः राजवध्वा द्रौपद्या सह द्वादशवर्षाणि वने अटन्त आसन्। पाण्डवानां मर्मदारणं दुःखं कवेरपि सह्यं नास्ति-

वनेऽटतां कण्टकगुल्मवल्लीप्रतानवल्मीकशीलावकीर्णे।
मुनिव्रतानामिव पाण्डवानाञ्च सस्मार स द्वादशहायनानि॥

अज्ञातवासकाले युधिष्ठिरः कङ्कनाम्ना, भीमस्तु वल्लभनाम्ना, अर्जुनो वृहन्नला, नकुलो ग्रन्थिकः, सहदेवः तन्तिपालस्तथा द्रौपदी सैरिन्ध्रीनाम्ना परिचित आसीत्। एवम्प्रकारेण द्वादशवर्षं यावत्तेऽटितवन्तः, ततस्तेषां राज्यप्राप्तिरूपं गौरवमण्डितदिनं समागतम्। राजोचितं वेशमाधाय वायुगतिसम्पन्ने स्यन्दने हस्तिनापुरं प्रति गमनमित्येतदेव काव्यस्यास्य मुख्यो विषयः कविना स्वप्रतिभया सृष्टः। 'यतो धर्मस्ततो जय' इति विषयं वारं वारमुपदिशति कविः। यथा वदति अर्जुनः-

अग्रे सरन् अवदर्जुन आशु राजन्
सत्यं शिवं भवति सुन्दरमित्यभिन्नम्॥ १८.६५॥

प्रायः सार्धैकसहस्रश्लोकैः विन्यस्ते काव्येऽस्मिन् ११२श्लोकेषु ९२ विधानामलङ्काराणां प्रयोगो लभ्यते। उदाहरणार्थम्-

राजान्तःपुरराजिताजिरमिलद्राजीवदृग्योषितां
श्रेणीषूज्ज्वलवेणिबद्धमणिषु श्रोणीलसद्दामसु।
मल्लीमाल्यममूल्यमण्डनमलं धम्मिलमूले दधुः
काचिद्वा कमलाङ्कुराणि चिकुरालङ्कारतां चक्रिरे॥

अत्र एकाधिकव्यञ्जनवर्णानामेकवर्णानाञ्च असकृदुच्चारणेन वृत्त्यनुप्रासः।
यथासङ्ख्यं यथा-

को वा सुन्दरतां दधाति मिलितश्चेत् कृत्स्नया
को वा भाति भृशं समेत उषया स्निग्धप्रभाभूषया।
को वा द्योतत उत्तरातनुरुचा ब्रूताद्य भो वन्दिन-
श्चन्द्रः प्रोद्यदिनोऽभिमन्युरिति तद्वाणी समाश्रयते॥

कविः वसन्ततिलकादिबहुप्रचलितच्छन्दःसु यथा कुशलस्तथैव पटुः कलहंस-मञ्जुभाषिणी-भुजङ्गप्रयात-मत्तमयूर-मृगेन्द्रयूथादिच्छन्दःसु। पाण्डवविक्रमस्य दशमसर्गे मत्तमयूरस्य पञ्चदशसर्गे मृगेन्द्रयूथस्य प्रयोगो लभ्यते। प्रतिसर्गमन्तिमेन श्लोकेन कविः पितरं प्रति श्रद्धाञ्जलिं निवेदयति-

योऽभूद्व गौतमगोत्रभूतिरतुला भा भट्टपल्लीभुवः।
प्रस्थानत्रयभाष्यभास्वरयशाः आचार्यपञ्चाननः।

अन्यत्र 'नानादर्शनचारुभाष्यरचनाकीर्त्तिस्त्रजालङ्कृतः, श्रीपञ्चाननतर्करत्न इति यो नाम्ना वुधो विश्रुतः' 'नानातन्त्रपुराणदर्शनगणव्याख्यानपञ्चाननः' इत्यानि विशेषणानि प्रयुक्तानि कविपुत्रेण। महाभारतस्य प्रसिद्धकथावस्तु कविप्रतिभया चिरं चकास्ति सहृदयानां मनोमुकुरे।

**सारस्वतशतकम्**-इति कोलकाताविश्वविद्यालयात् प्रकाशिते चित्रकाव्ये एकादशाधिकैकशत(१११)श्लोकैः विराजन्ते सचित्राः काव्यबन्धा वृक्ष-पद्म-मुरज-गोमूत्रिका-काञ्ची-हार-माल्य-कङ्कण-अक्षमाला-कुम्भ-मयूर-हंस-पुस्तक-वीणा-आसन-घट-पताका-घण्टा-शङ्ख-स्वस्तिका-पद्यमाला-पद्यमालिका-रथ-गज-अश्व-विमान-धेनु-सर्प-अङ्कुशादिबन्धाः षड्वष्टिः सङ्ख्यकाः।

संस्कृतेन आङ्ग्ल्या वङ्गवाण्या च चित्रकाव्यस्य इतिहासमुखेन उपक्रमणिकां विधाय काव्यं निरूपयति। संस्कृतश्लोका वसन्ततिलकेन रचिता अपि वङ्गभाषया रचिता इति प्रमादो भवति। तत्समशब्दानां बाहुल्ये क्रियापदादीनां वर्जने भाषाद्वयस्य साम्यं दर्शनीयमेव-

शुभ्रोज्ज्वले शतदले तव पादपद्म
शोभाधरे मधुरिमा भुवनप्रकाशे।
ऊषा यथा किशलये तव देवि
सद्यो भासे च खे शशिकला विकला सकाशे॥

कविः काव्यस्य उपसंहारे वदति-

स्वच्छन्दाखिलतर्ककर्कशवनीसञ्चारपञ्चानन-
श्रीपञ्चाननतर्करत्नचरणान् विद्यागुरून् जन्मदान्।
तानानम्य सभक्ति तत्करुणया सिक्तोऽनयत्साङ्गताम्
श्रीसारस्वतचित्रपद्यशतकं श्रीजीवशर्मा श्रिया॥
वङ्गेषु भट्टपल्ली सुमनोभरसुरभिता कापि वल्ली।
तत्राकृत धृतजीवः श्रीजीवो गौतमस्तदिदम्॥

**ऋतुचक्रचङ्क्रमणम्**-इति कालिदासस्य ऋतुसंहारमिव गीतिकाव्यम्। परन्तु अत्र वसन्तात् प्रारभ्य षड्तूनां चङ्क्रमणं कल्पयति कविः। वसन्तस्य समागमे कविर्गायति-

किमिव नवसुन्दरं सकलशुभलक्षणं
परमसुखमन्दिरं प्रकटितमनुक्षणम्।
जातमिदमद्यतनविश्वम्
नयनयुग पश्य सुखदृश्यम्।

मेघमल्लारेण सह विद्युतश्चमकृतिः, काचिदपूर्वा विच्छित्तिः!

गगनं सघनं श्यामलभासं विद्युदुदयकृतपीतविलासम्।
अनुकुरुते ननु केशववेशं पाञ्चजन्यरववक्त्रोन्मेषम्॥

मुनिरिव प्रशान्तो हेमन्तः कविलेखन्या उज्जीवितो यथा-

शरदवसाने भुवि हेमन्तः स्वैरं प्रसरति मुनिरिव शान्तः।
नाधिकतापं नाधिकशैत्यं वितरति शमतां प्राणिषु नित्यम्॥

महाकविकालिदासम्-महाकवेः कालिदासस्य जीवनचरितमुररीकृत्य पञ्चभिरङ्कैः रचितमिदं नाटकं गौरीनाथशास्त्रिण आदेशेन उज्जयिन्यामनुष्ठिते कालिदाससमारोहे प्रयोक्तुम्। अत्र ध्यानेशनारायणचक्रवर्ति-अशोकचाटार्जीप्रभृतयः तात्कालिकाः पण्डिताः भागग्रहणेन यशस्वितया नाट्यं प्रस्तुतवन्त इति श्रूयते। प्रचलितकिम्बदन्तीनां सुमधुरविन्यासेन नाट्यकारः साफल्यं प्राप्तवान् इति वक्तुं शक्यते।

दशपुर-राजकुमार्यां विद्यावत्या अपमानेन त्रयः राजकुमाराः नरेन्द्रः समरेन्द्रो मथुरेशश्च निश्चितवन्तः- केनापि मूर्खेण तस्या विवाहं सम्पादयितुम्। तदा ते कूर्मनाथं(कालिदासं) प्राप्य कार्यं सम्पादयन्ति, यः खलु- 'स च शाखाग्रभागे तिष्ठन् शाखामूलं छेत्तुं व्यवसितः।'(पृ.1-40, भागः-1, रू.च.।)

द्वितीयेऽङ्के विवाहात् परं वरस्य ज्ञानपरिचयं प्राप्य स्वभाग्यं विनिन्द्य मूर्खं तं विताडयति- 'हा दुर्दैवम्! धिक् धिक् मे विद्याविभवम् यदहम् विद्याहीनस्य हस्तयोः पतितास्मि।' तृतीये अङ्के विताडितः कूर्मनाथः नर्मदातटे श्मशानसन्निकटे वने वाग्देवीं स्तौति। प्रसन्ना देवी वरं प्रददाति- 'वाग्विभूतिमान् भव, विश्वविजयी भव।' चतुर्थेऽङ्के शिबिकावहनार्थं धृतस्य कालिदासस्य कवित्वपरिचयं प्राप्य विक्रमादित्यस्तं नवरत्नेषु अस्थापयत्। पञ्चमे विक्रमादित्यस्य माध्यस्थे कविः कालिदासः पत्न्या सह मिलति।

अत्र छन्दः-अलङ्कार-नान्दी-प्रस्तावना-विष्कम्भक-अङ्कावतार-सन्धि-गर्भाङ्क-भरतवाक्य-प्राकृतभाषिभृत्यादीनां कल्पने नाट्यकारस्य प्रदर्शिता स्फूर्त्तिः

कालिदासस्य वर्णने अभिनवकालिदासस्यास्य पूर्त्तिः जाता इति वक्तुं शक्यते।

तन्वी श्यामा रुचिरवदनास्तोजकान्तिं दधाना
मध्ये क्षामा नयनकमलोन्नेयकर्णावतंसा।
कम्रौ बाहू विटपललितौ बिभ्रती शुभ्रदन्त-
ज्योत्स्नास्नाताधरपुटदला सैव कान्ता मदीया॥ पृ.३६॥

प्रवर्ततां प्रकृतिहिताय पार्थिवः पतिव्रता जयति जगत्सुपूजिता।
सरस्वती श्रुतिमहती महीयतां न हीयतां कविकुलकर्म शर्मदम्॥
॥पृ.६९-७०॥

**पुरुषपुङ्गवः(भाणः)**-नायकस्य वाग्वीरस्य चरित्रमाध्यमेन पुरुषाधिकृत-समाजस्य उपहासमकरोत् श्रीजीवन्यायतीर्थः। एवंविधा नायकाः परस्त्रीभ्यः स्वेच्छाचारमुपदिश्य स्वपत्नीं यवनिकान्तरालं स्थापयन्ति। परस्त्रीभिः स्वेच्छया विहरन्तः अन्यैरालापाय स्वपत्नीं निषिध्यन्ति। स्वार्थप्रणोदिता प्रवञ्चना नायकस्य मुख्यमस्त्रम्। तन्मतेन- 'यदिदं स्त्रीणां स्वातन्त्र्यमुपदिश्यते सधवानाम् अधवानां विधवानां वा तत्सर्वं परनारीविषयम्।' नायकस्य चारुचित्रमित्थमुपस्थापयति नाट्यकारः- 'वाग्वीरः यः किल नारीसदसि वीरायते, धीरायते शिशुसंसदि, कीरायते च विद्वत्परिषदि। तनोति नीतिवर्जनं परपीडनाय, करोति गर्जनं निरीहशासनाय, कूटसर्जनञ्च जनवञ्चनाय।'

**भट्टसङ्कटम्**-हास्यरसाङ्गित्वेन इदं पञ्चाङ्कयुतं प्रहसनम्। यज्ञपरायणस्य ब्राह्मणस्य भट्टस्य तत्पत्न्याः कामिन्याश्च कलहमत्र मुख्यविषयः। कामिनी कुरूपा कटुभाषिणी च। एकदा विराधवलाकौ इति राक्षसौ कामिनीमपहरतः। स्त्रीविहीनो भट्टो यज्ञसम्पादने अक्षमः सन् राज्ञः शरणं याति। द्वितीयदाराग्रहणाय राजा आदिशति। परन्तु कुरूपां कटुभाषिणीमपि धर्मपत्नीं त्यक्तुं ब्राह्मणो नेच्छति। तस्या उद्धाराय यतते। अत्र नायकस्य प्रेमस्वरूपं प्रकाशयति नाट्यकारः। राक्षसाश्च यज्ञसमये पठितैरुच्चाटनमन्त्रैः पीडिता भवन्तीति यज्ञकर्मणि वाधाप्रदानाय कामिनी अपहृता इति वदन्ति। राक्षसानामपि हृदयमस्ति इति सम्यक् प्रतिपादितमत्र- 'ब्राह्मण, न वयं मानुषभक्षकाः, न वा परकामिनीलोलुपाः राक्षसाः।' अन्ततो ब्राह्मणेन उच्चाटनमन्त्राः न पठिष्यन्ते इति पणेन कामिनी मोचिता। परस्परसद्भावेन देशस्य समृद्धिरिति कव्युक्तिः वर्तते।

सन्ति स्त्रियः स्वामिमनोऽनुकूला लसन्तु धर्मा विधिबोधमूलाः।

वसन्तु विद्या नृषु धर्म्यवेशा हसन्तु धर्मैकधनाश्च देशाः॥

**पुरुषरमणीयम्**-इति अङ्कद्वययुतं प्रहसनम्। १९३३ संवत्सरे पदव्रजेन भारतपरिक्रमाव्याजेन निर्गतस्य काञ्चीकामकोटिपीठस्य शङ्कराचार्यस्य सम्मानार्थम् आयोजितायां सभायामिदं प्रहसनं प्रदर्शितम्। शिक्षां समाप्य सुबन्धु-सोमदत्तौ अन्यप्रदेशगतौ शृणुतः- राज्ञी सीमन्तिनी दम्पतीभ्यः उपायनं प्रददाति। अतः सोमदत्तः सुबन्धोः नारीरूपेण वेशं धारयित्वा उपायनं गृह्णाति। परन्तु 'विना विवाहं दाम्पत्यं परिहासाय कल्पते।' अतः तस्य नारीरूपं पुनः न परिवर्तितमिति अन्ततः सुबन्धुना विविहिता। साधारणं विषयमपि नाट्यकारः स्वशैल्या उत्तमरीत्या उपस्थापयति। वृत्तिहीनसमस्यां प्रतिपादयति सुबन्धुमुखेन- 'स्वपृष्ठादवतार्यतां सा विद्यागोणी या गुरुसकाशाद् अधिगताद्य गतिं मन्दीकरोति।'

**दरिद्रदुर्दैवम्**-इति प्रहसने समाजस्य प्रकृतं रूपमुद्घाटयितुं लेखको बद्धपरिकरो दृश्यते।

अन्धः कुष्ठी दरिद्रो वा प्रतिवेशी वरं भवेत्।
समानधनगर्वेण स्पर्धमानो हि दुःसहः॥

इति सामाजिकस्य स्वरूपम्। अतः दरिद्रो वक्रेश्वरो यदा भिक्षातण्डुलान् गोपायितुमिच्छति, तदा अधःपतिताः नष्टा भवन्ति। तं भृशं तर्जति गृहिणी। तदा सिद्धदम्पत्योराशीर्वादेन स पाशकं लभते, यस्य प्रयोगेण स प्रचुरतया तण्डुलान् लभेत। परन्तु तत्र प्रतिवेशिनामपि दारिद्र्यं गच्छेदिति ज्ञात्वा स पाशकान् ज्वालयितुं प्रस्तुतो भवति- 'पाशकानां कीदृशो महिमा। अन्येऽपि भिक्षुकाः सर्वे प्राप्तपर्याप्ततण्डुला हसन्ति ...पाशकक्षेपः सर्वथा रोद्धव्यः। सर्वेषां तण्डुलागमो मम कर्मफलेन समानो यदि स्यात् तदा वरं मे दारिद्र्यम्। ...गृहिणी! सत्वरं ज्वलय वह्निम्। पाशकास्तत्र नूनं क्षिपामि। अन्यथा न मे शान्तिरस्ति।' कविः लोकोपकारभावनापोषणाय प्रार्थयति-

खलता खलता समाखिलं नरचित्तं परिहाय खेलतु।
प्रतिवेशिसुखाभिलाषिता लसताल्लोकमनःसु सन्ततम्॥
॥सं.सा.प.प.-७१॥

**साम्यसागरकल्लोलम्**-इति एकाङ्कं रूपकं स्वाधीनोत्तरदेशस्य ज्वलत्समस्यासु

पथभ्रष्टयुवसमाजस्य मार्गदर्शनायालम्। साम्यवादस्य सूत्रमन्विष्यति नाट्यकारः-

विदूषकः- नाहं शैवो न मत्तोऽस्मि। भवामि साम्यवादी।

सूत्रधारः- तस्य किं लक्षणं ब्रूहि।

विदूषकः- सर्वजीवेषु शिवज्ञानं कुर्वन् साम्यवादी भवति।

नेतारः स्वानुचरान् कथं पथभ्रष्टान् कारयन्ति इति गणनाथस्य चरित्रेण ज्ञायते। गणसैनिकानां निर्देशेन कृषकाः श्रमिकाः कर्मकराश्च जागरिता भवन्ति। आपणिकस्य चरित्रेण ज्ञायते कृषकाणां श्रमिकाणां बन्धुः साधारणनागरिकोऽपि कथं हिंसितो भवति। आपणिको ब्रूते- 'महोदयाः, गृहस्थधर्ममनुपालयता मया प्रत्यहं गृहमागतेभ्यः याचकेभ्यो दीयते यथाशक्ति तण्डुलो गोधूमचूर्णं गुडञ्च। वैशाखमासि प्रतिदिनमार्द्रचणकगुडजलानि ददामि श्रमिककर्षकादिभ्यः पथश्रान्तेभ्यो दीनद्विजेभ्योऽपि।' सहसा उत्क्षिप्ता युवानः प्रतिवदन्ति- 'द्विजेभ्योऽपि वदन् न लज्जसे?' नेतुरादेशेन ते आपणिकस्य सर्वस्वं लुण्ठन्ति। रूपकेऽस्मिन् यतिः कश्चन वर्तते शान्तिप्रिय ईश्वरविश्वासी च। स गणनाथस्य रक्षार्थं स्वयं गणनाथस्य वेशं धारयति। हिंसानिवारणार्थमीश्वरं प्रार्थयति- 'सर्वत्र श्रूयते हिंसा हिंसेति। जातो मानवानां बुद्धिविपर्ययः। हिंसानिवारणार्थं प्रार्थितो मया देवादिदेवो महादेवः।' अन्ततः प्रकृतमवगत्य तमालिङ्ग्य गणनाथो ब्रूते- 'भवानेव सत्यदर्शी निःस्वोऽपि निःसहायोऽपि जनगणकल्याणं कामयते, भवानेव निःस्वार्थः, अयमेव भारतीयभावमहिमा।'

नामानुसारं रूपकमिदं प्राच्यसाम्यवादस्य जीवमात्रं दयाभावस्य महिम्ना महीयते, यत्र तथाकथितस्य साम्यवादस्य प्रकृतं ज्ञायते। अङ्गीरसः करुणः प्रतीयते। अतः नाटकं तस्य अवान्तरभेदेषु वास्यान्तर्भावासम्भवाद् रूपकमिति कथनं याथार्थ्यमावहति।

श्रीशङ्कराचार्यवैभवम्-इति श्रीशङ्कारचार्यस्य जीवनचरितमुपजीव्य प्रणीतं वर्तते। शिव उपनिषदो ज्ञानकाण्डस्य प्रचाराय स्वयं शङ्कराचार्यरूपेण, कर्मकाण्डस्य प्रचाराय कार्तिकेयः कुमारिलरूपेण, इन्द्रः सुधन्वराजरूपेण जन्मग्रहणाय आदिशति। शङ्करस्य जन्म-बाल्य-सन्न्यासग्रहणादिकथा अत्र वर्णिताः। संस्कृतभाषायाः तात्कालिकावस्थां दुःखेन प्रतिपादयति नाट्यकारः विदूषकमुखेन-

गीर्वाणवाणी किल या तदानीं कान्तेव शान्तेरभवन्निदानम्।

सैवाधुना वृद्धनटीव लोकेरालोक्यते नर्मकटाक्षभङ्ग्या॥

स्वातन्त्र्यसन्धिक्षणम्-इति प्रहसनमुच्यते। परन्तु अत्र वस्तु ततो भिद्यते। धनेश-गणेश-रणेशादियुववर्ग आङ्ग्लशिक्षया गर्वितः अस्माकं संस्कृतिमवगणयति।

आङ्ग्लानां वंशपञ्जीं विश्वमानवरञ्जिनीम्।
ग्रीसरोमककीर्त्तिञ्च जानतां नः स्मृतिश्च्युता?
॥पृ.४०, सं.सा.प.प., १९५७॥

प्राच्यसंस्कृति-विश्वबन्धु-भारतमाता-यतिवराश्च वारं वारं युवसमाजस्य समीपे आङ्ग्लशासकानां प्रकृतं चित्रमुपस्थापयन्ति। आङ्ग्लशासनस्य प्रतिभूः श्वेताङ्गो वदति १५० उपभुज्य अधुना स्वतन्त्रता प्रदीयते, तत्र अस्माकमौदार्यमेव कारणम्-

स्वातन्त्र्यनामकमहो महनीयवस्तु को वा प्रदातुमभिवाञ्छति दुर्गतेभ्यः।
भो भो भारतीयाः प्रतिगृह्यतामस्माभिः दीयमानं स्वाधीनताधनम्।

आङ्ग्लप्रतिनिधिना भारतमातुः वस्त्राञ्चलं द्विखण्डितमपि देशवासिभिः स्वीकृतम्। 'पाकिस्थानस्थापनं नः प्रतिज्ञा, उष्णैः शोणितैः जयामः। ...पाकिस्थानं पाकिस्थानं देहि, अन्यथा पुनरपि युद्धं भवेत्।' 'अखण्डिता खण्डिता वा, संज्ञाना लुप्तज्ञाना वा भारतभूमाता स्वातन्त्र्यमनुभवतु।' तदनु करणीयं किमपि नासीत्। नाट्यकारो वदति- 'सर्वत्र सम्प्रदायिककलहः रुधिरस्रोतश्च दृश्यताम्।' दुर्भिक्ष-दुर्नय-कलहेतिचरित्रत्रयेण स तात्कालिकीं परिस्थितिं विशदयति- 'वयमिह दूताः। आङ्ग्लमङ्गलसाधनभूताः, वञ्चितनिजबलवुद्धिविमर्शं कुर्मो वयमाहूताः।'

नाटकेऽस्मिन् प्राच्यसंस्कृति-भारतमाता-दुर्भिक्ष-दुर्नय-कलहादिचरित्राणाम् अवतारणेन कृष्णमिश्रस्य प्रबोधचन्द्रोदयनाटकं स्मर्यते।

सिन्धुसौवीरसङ्ग्रामम्-इति एकाङ्के रूपके श्रीजीवन्यायतीर्थेन काश्मीरसमस्या विवृता। सिन्धुः भारतस्य सौवीरः पाकिस्थानस्य प्रातिनिध्यं कुरुतः। युद्धविरामेन रूपकं समाप्तं भवति। अहिंसासाधकैरपि देशरक्षणाय युद्धं क्रियते इति स्पष्टं वदति भारतसेनापतिः- 'भारतराष्ट्रे समदृष्ट्या हिन्दुमहम्मदबौद्धजैनक्रैस्तवानां स्थितिरस्त्येव। ...वयं शान्तिकामा अपि अहिंसामन्त्रसाधका अपि पराक्रमणप्रतिरोधाय स्वराष्ट्ररक्षणाय च मृत्युपणे सन्नद्धाः स्म।'

**विवाहविडम्बनम्**-इति प्रहसने श्रीजीवन्यायतीर्थेन भारतीयसमाजे विधवानां निष्करुणं जीवितं निरूपितं वर्तते। षष्ठिवर्षदेशीयो वृद्धो नायको रतिकान्तो वर्षद्वयाद् विधुरः सन् कर्मकर्व्या आवश्यकतामनुभूय घटकमाध्यमेन द्ररिद्रस्य पुनः ऋणग्रस्तस्य पितुः वांलादेशीयां चन्द्रलेखामिति कन्यां परिणयति। धनप्राचुर्येण रतिकान्तः स्वतारुण्यं प्रदीपयितुं विविधान् उपायान् अवलम्बते। अस्मिन् विवाहे केषाञ्चन तरुणानां विरोधेऽपि स सफलो भवति। नायकमुखेन विधवानां स्थितिं निरूपयति-

'वैधव्यदावदग्धमुखी शृगाली' 'एको भृत्यो विधवा भगिनी काचन दासी च प्रतिपाल्यन्ते'। भ्रातृभगिन्योरालापः स्पष्टीकरोति विषयम्-

रतिकान्तः- विधवामुखदर्शनं यात्राभङ्गाय भवति।

विधवा- अहं गृहमध्ये प्रविश्यैव तिष्ठामि। त्वं तावद् गोब्राह्मणहुताशनदर्शनपूर्वकं यात्रां कुरु। इतोऽपि विद्रूपस्वरेण नाट्यकारः समाजचित्रमङ्कयति, यदा घटको जिज्ञासते रतिकान्तम्- हम् , एका विधवा भवद्गृहे दृष्टा, का सा?

रतिकान्तः- मम सेवार्थं काचन परिचारिका गृहे रक्षिता।

घटकः- सा तु कथयति भवतो भगिनीति।

रतिकान्तः- एवमेव परिचारिकानां भवति स्पर्धा॥

॥ पृ.४०-९८,संस्कृतप्रतिभा,३,१,७७॥

एवमेव सर्वत्र श्रीजीवन्यायतीर्थेन नाटकेषु सामाजिक्यः समस्या निरूपिताः सन्ति।

**माधुरीसुन्दरम्**-इति दशाङ्कयुते प्रकरणे श्रीजीवन्यायतीर्थेन वीणावादकस्य सुन्दरसिंहस्य राजकन्याया माधुर्य्याश्च प्रणयगाथा वर्णिता। राज्ञा महाबलेन अपमाननं, विताडनं, पुनः नायकनायिकयोर्मेलनमत्र कविकल्पितं वस्तु वर्तते। कैश्चित् स्वीक्रियते यत् सङ्गीतज्ञस्य यदुभट्टस्य जीवनकथामुपजीव्यमिदं रचितम्। यदस्तु नाम सर्वत्र प्रणयस्य जयगानं करोति कविः - 'सभासु भूयाद् गुणिनां समादरः पवित्ररूपः प्रणयोऽस्तु पूजितः।'

**रघुवंशम्**-दिलीपाद् दशरथं यावद् राज्ञां कथात्र उपन्यस्ता। अन्धमुनिदम्पत्योः पुत्रशोकः असाधारणशैल्या उपस्थापितः अत्र श्रीजीवन्यायतीर्थेन॥ प्रणवपारिजातः, 5-5-101॥

**कुमारसम्भवम्**-कुमारसम्भववस्तु उपजीव्य पञ्चाङ्कं नाटकमिदम्।

**कैलासनाथविजयम्**-इति एकाङ्कविशिष्टे वीररसाश्रिते व्यायोगे रावणस्य कैलासोत्पाटनमत्र वर्णितम्।

**गिरिधरसंवर्द्धनम्**-वीररसाश्रिते अस्मिन् व्यायोगे कृष्णस्य गोवर्धनधारणं वर्णितम्।

**विवेकानन्दचरितम्**-स्वामिनो जीवनचरितमाधारीकृत्य रचितमिदं पञ्चाङ्कं नाटकम्।

**निगमानन्दचरितम्**-सन्न्यासिनो निगमानन्दसरस्वतिवर्यस्य चरितमत्र निरूपितम्।

**चण्डताण्डवम्**-द्वितीयविश्वयुद्धस्य वीभत्सरूपं प्रकटयति अङ्कद्वयेन। हिटलार-मुसोलिनी-स्टालिन्-चरित्राणां माध्यमेन लोभक्रोधहिंसाधर्मादिमानविकगुणैः च नाट्यकारः तात्कालिकं समाजं सम्यगुपदिशति।

**रागविरागम्**-सामाजिकानां मनसि सङ्गीतं कथं प्रभावमुत्पादयतीत्यत्र वर्णतमस्ति। सङ्गीतचार्चायां निषेधाज्ञां प्रदत्तवतो राज्ञो मोहभङ्गो भवति यदा राजपुत्रः सङ्गीतमाधुर्येण पितृहननस्य प्रतिज्ञां त्यजति, राजकन्या मन्त्रिपुत्रेण सह देशान्तरगमनाद् विरता भवति, सन्न्यासी च विषयभोगेच्छां त्यजति। तदा राजा वदति- 'सत्यं सङ्गीतमहिमा मां मोहयति। सङ्गीतेनैवाद्य मे जीवनधनमानाश्च रक्षिताः। नाहं कृतघ्नः।' अस्मान्नाटकान्नाट्यकारस्य सङ्गीतज्ञानं प्रीतिश्च ज्ञायते।

**शतवार्षिकम्**-इति प्रहसने विज्ञानस्य वरदानमभिशापश्च युगपन्निरूपितौ। रकेट नेन ब्रह्मलोकागतेन वैज्ञानिकेन मर्त्यमणिना भीतभीता मङ्गलवुधशुक्रचन्द्रादयो न संवदन्ते। अन्ततो ब्रह्मणो माध्यस्थेन समाधानं भवति। यन्त्रेषु नियन्त्रणाय यन्त्रयुगस्य मानवं नाट्यकार उपदिशति-

क्रियते चेन्न यन्त्रीयविज्ञानस्य नियन्त्रणम्।
शतवर्षान्तरे पृथ्वी नूनं ध्वस्ता भविष्यति॥

**चिपिटकचर्वणम्**-इत्यत्र कस्यचन कृपणस्य चरित्रं चित्रितं वर्तते। कृपणः कपाली धनलोभी आसीत्। तस्य मूर्खतावशात् तान्त्रिकेण तस्य सर्वं

धनमपहृतम्। एतादृशसाधुजनानां साक्षात्कारोऽधुना प्रायश एव लभ्यते। प्रहसनेनानेन आचार्येण एतद्वक्तुमीयेष यद् भण्डाद्भयमस्ति, तस्मात् सावधानेन भाव्यम्। नान्दी, भरतवाक्यम्, प्रस्तावना सर्वेषामुपस्थापनं यथायथमेव जातम्। रचनान्ते तेन किं रचितं तद्विषये तस्य मनः सन्दिग्धायते स्म। तस्मात् 'रामनामदातव्यचिकित्सालयम्' इत्यस्मिन् प्रहसने सूत्रधारमुखेनोक्तं- "वयस्य। सम्यग्विचारयसि। यदिदं रूपकं प्रयोक्तुमिष्यते, तन्न प्रकरणम्, न नाटकम्, न भाणः, न व्यायोगः, नापि प्रहसनादिकम् अतो दशलक्षणविलक्षणमेव।" इति। अन्तिमे तेनोक्तं 'समाप्तमिदं रूपकम्' इति॥ पृ.43, रू.च.॥

**चोरचातुरीयम्**-इति मुखसन्धिद्वयेन युतं प्रहसनम्। अत्र चौर्यनिपुणस्य नायकस्य घटङ्करस्य नैपुण्यं साधोरुपदेशेन परिवर्तनञ्च सुष्ठु निरूपितम्। सत्यमुक्तं नाट्यकारेण- 'स्तेयं हि स्वभावधर्मो जीवानाम्। मूषको वञ्चकः कपिः काको मार्जारः छुछुन्दरी छागादयश्च सर्वे स्तेयकलाकुशलाः, किमहमेतेभ्योऽपि अधमोऽस्मि। दुर्लभं मानुषं जन्म लब्ध्वा अहं किमकृतार्थो मरिष्यामि? चौर्यं पापमिति घुष्यते स्नायुदुर्बलैः स्थविरैः अकर्मण्यैः भीरुभिर्वा।' पृ.34, सं.सा.प.प., 1951॥

**क्षुत्क्षेमीयम्**-इति प्रहसनस्य प्रस्तावनायां सूत्रधारेण ज्ञाप्यते क्षुधाज्वालाप्रशमनाय अस्य प्रहसनस्य विरचनमिति। धनिनो गृहे निमन्त्रितस्य दरिद्रस्य भोजनव्यवस्थापि प्रहसनं मन्यते नाट्यकारेण श्रीजीवन्यायतीर्थेन- 'ही ही भोः पश्यतु इतः काष्ठासनश्रेणीम् इतश्चषकपूर्णम् उष्णपानीयम् इतस्ताम्बूलानि इतश्च धूमवर्तिका।' सत्यं वदति दरिद्रः- 'अहो स्वतन्त्रराष्ट्रस्य धनिनां खाद्यव्यवस्था।' श्रेष्ठिनः रङ्गनाथस्य गृहमागतः चित्रगुप्तः पश्यति कुत्रापि पिपिलिकाप्रवेशाय अवकाशो नास्ति, कुतः पुनः तस्य। परन्तु ज्योतिषिकः स निधिसन्धानं जानाति इति श्रुत्वा तस्य अपूर्वसत्कारो भवति। स चातुर्येण दरिद्रसेवामुपदिशति श्रेष्ठिने॥ पृ.22, रू.च.॥

**नाट्यवैशिष्ट्यम्**-श्रीजीवस्य दृश्यकाव्यानि श्रव्यकाव्यापेक्षया रमणीयानि सन्ति। भारतवर्षस्य पल्लीचित्रं, दारिद्र्यं, समाजस्य बलनानि स्खलनानि, स्वाधीनतां, नवजागरणस्यावाहनं, कार्पण्यं, काश्मीरसमस्यादिसर्वं तस्य लेखनी परिप्रकाशयति। सरससंवादाः, मधुरालापाः, लोकोक्तयः, मानविकमूल्यबोधाः,

जातीयप्रगतिपरा चेतना, राष्ट्रियभावना च तस्य नाटकेषु विलसन्ति। स्वाधीनचिन्ता यथा-

मज्जामि सिन्धौ विहरामि शैले व्योम्नस्तले सोमसुधां पिबामि।
धावामि भूयो विचरामि भूमौ नृत्यामि गायामि यथाभिलाषम्॥

साम्यवादिनो लक्षणं यथा- "अतो वम्साधकाः शिवमेव ब्रह्मपरं भावयन्तः प्राचीनाः प्रति जीवं शिवरूपं पश्यन्तः साम्यवादिनो भवन्ति।" यन्त्रविज्ञानस्य नियन्त्रणविहीनं विध्वंसकरं रूपमपि नाट्यकारस्य समक्षमासीत्। यथा-

क्रियते चेन्न यन्त्रीयविज्ञानस्य नियन्त्रणम्।
शतवर्षान्तरे पृथ्वी नूनं ध्वस्ता भविष्यति॥

रूपकेषु वङ्गीयप्रवादवचनानां प्रयोगः सुनिपुणतया आचार्येण कृतम्-

विकीर्णेषु अन्नेषु काकानामभावो न भविष्यति(विवाहविडम्बनम्)- ভাত ছড়ালে কাকের অভাব হবে না।

भक्ष्यं लब्ध्वा कक्कुरा अपि नीरवा भवन्ति। किं पुनस्तरुणाः- খাবার পেলে কুকুরেরও মুখ বন্ধ হয়।

सर्वे यदि प्रतिज्ञाबद्धाः स्युः किं ममास्ति पितृश्राद्धं यदहं ज्वालयामि(वनभोजनम्)- সকলে চুপ করে আছ, তবে আমার কি পিতৃদায়।

छिनत्ति को हि नासां स्वां परयात्राविपत्तये- কে আর নিজের নাক কেটে পরের যাত্রা ভঙ্গ করে?।

गङ्गाजलोपचारेण गङ्गापूजेव राजताम्- গঙ্গাজলে গঙ্গাপূজা।

अहं दण्डकाष्ठेन तस्य मुण्डं कुट्टयिष्यामि- লাঠি দিয়ে মাথা গুঁড়িয়ে দেব।

चौरे पलायिते किं ते वर्द्धतेतरां बुद्धिः?- চোর পালালে বুদ্ধি বাড়ে।

नेत्रहीनस्य मे यथा दिवा तथा रात्रिः- অন্ধের কিবা দিন কিবা রাত্রি!

सर्वान् श्यालान् जानामि- সব শালাকে জানা আছে।

न खलु परिज्ञातब्राह्मणस्य यज्ञसूत्रप्रदर्शनमावश्यकम्- চেনা বামুনের পৈতে লাগে না।

साहित्यं खलु समाजस्य दर्पणः। यत्र सामाजिकजीवनस्य च्छाया प्रतिविम्बिता भवति। श्रीजीवन्यायतीर्थस्य सृष्टिविषयेऽपि समाजिकप्रतिफलनं यथायथं प्रतिविम्बितम्। श्रीजीवन्यायतीर्थस्य सारस्वतसम्पत्तिः भाषान्तरं नानूदितेति प्रसिद्धिं न गता। वङ्गभाषया आङ्ग्लभाषया च प्रो.ऋताचट्टोपाध्यया लिखिताः समीक्षाः आधुनिक-पारम्परिक-समीक्षकाणां हस्ते न लग्ना। एकदा

अस्य सारस्वतसिद्धिः जगतितले अवश्यं प्रसिद्धिं प्राप्स्यति। उक्तमेव तया- "Pt. Srijiva Nyayatirtha with his good many prahasanas depicting freshness of techniques and modernity of thoughts, clearly reflecting wonderful philosophies is capable of being regarded as a pioneer in the field of new farcical plays or prahasanas devoid of vulgar eroticism commonly found in older ones."[67]
सा अग्रे Truman Capote-महोदयस्य भाषया वदति- "Someone rare has written these very fine prahasanas, a writer with the loveliest sense of life and the warmest, most authentic hunour, - touching books and so funny, so likeable."[68]

**स्फुटरचनाः** - एतदतिरिच्य श्रीजीवन्यायतीर्थेन प्रस्तुताः सन्ति विविधाः प्रबन्धाः प्रशस्तयः स्फुटकाव्यस्तोत्रानुवादादयः। सत्यमेव कवेरस्य प्रशस्तयः प्रशस्ताः सन्तिः। 'सोऽयं विश्वकवी रवीन्द्रविभवो जीयाज्जगत्पूजितः' इति पदस्य आवृत्या रचिता प्रशस्ति अत्युत्तमा वर्तते-

यद् गीताञ्जलिमञ्जुलाक्षररसक्षीरं पिबन्तो मुदा
पाश्चात्याः सुधियो विमुग्धहृदयाः सर्वैकगर्वास्पदम्।
नोवेलाह्वयभुरिमानदपुरस्कृत्यार्चयन् यत्कृतिं
सोऽयं विश्वकवी रवीन्द्रविभवो जीयाज्जगत्पूजितः।

'नमत जनास्तं कविद्विजेन्द्रम्।' इति द्विजेन्द्रलालस्य, 'भासि तथापि सुनीतिकुमारः' इति सुनीतिकुमारस्य, सुवर्णजयन्त्याः प्रशस्तिनिर्माणे, क्षितीशचन्द्र-अनन्तकुमारतर्कतीर्थ-अक्षयकुमारशास्त्रि-विजनकुमारादीनां विलापे, जानकीनाथादीनामभिनन्दने विलसन्ति तस्य काव्यानि। लक्ष्मी-नारायण-दुर्गा-गङ्गा-जगद्धात्री-श्यामा-कात्यायनी-शङ्कराचार्य-रामकृष्णादिभ्यः प्रणीतानि शताधिकानि स्तोत्राण्यपि आह्लादयन्ति कमपि पाठकम्। यथा-

जाह्नवि! हर वाङ्मयमम्ब! दशविधपापहरे!
जाह्नवि! हर मानसमम्ब! दशविधपापहरे!

यद्यपि कवेरस्य अनुसर्जनकार्यं न प्रसिद्धं तथापि रवीन्द्रनाथस्य धर्मप्रचार-वर्षशेष-नववर्ष-उत्सवेर दिन-दुःखादिप्रबन्धास्तेनानूदिताः सन्ति। वार्डस्वर्थवर्यस्य

---

[67] 20th Cen. Sans. Lit. p.182
[68] पण्डित श्रीजीव न्यायतीर्थेर सारस्वत साधना, पृ.५५।

'By the Sea' काव्यस्य 'सायं सिन्धुतटे' इति तस्य मूलानुगमनुसर्जनं पश्यन्तु तावत् प्रेक्षावन्तः-

It is a beautiest evening, calm and free
The holy time is quiet as a 'Nun'
Breathless with adoration; the broad sun
Is sinking down in its tranquillity.

इयं हि सन्ध्या रुचिरा च धीरा ध्यानस्थिरा योषिदिव व्रतस्था।
पूता प्रशस्ता पृथुतामुपेतो भानुः शनैर्मज्जति शान्तिनीरे॥

The gentleness of heven broods over the see;
Listen; the mighty Being is awake,
And doth with his eternal motion make
A sound like thunder - ever lastingly.

सिन्धुर्नभः स्थैर्यगुणं दधाति जागर्त्यहो सोऽतिमहानिदानीम्।
दुर्व्वारचाञ्चल्यवशाच्चिराय वज्रारवं भैरवमातनोति॥

अन्तिमभागस्य अनुसर्जनं मूलापेक्षया अधिकतया ऐशीभावनया अनुप्राणितमस्ति।

मत्सङ्गिनो ये शिशवोऽत्र सन्ति भावोदयश्चेतसि चेन्न तेषाम्।
नाशङ्क्यमेतद्यदि मे विधातुः कारुण्यतो न्यूनतयापि हीनाः॥
ते देव भावेन सदा रमन्ते भक्ता यथा देवगृहान्तरस्थाः।
ईशः स्वयं तैः सह वर्तमानो विद्मो वयं यद्यपि तन्न सम्यक्॥

कथमपि तुलना नास्ति श्रीजीवन्यायतीर्थस्य रचनायाः। यथा श्रव्यकाव्यस्य तथा दृश्यकाव्यस्य प्रणयने प्रणयिनी तल्लेखनी अनुसर्जनेऽपि गतिं न जहाति। अतः गङ्गाजलेन गङ्गापूजनमिव तस्य भाषया भवत्वस्माकीनं भरतवाक्यम्-

निष्कामकर्म जयताद् भुवि शर्महेतुः
दीनस्य सङ्कटसमुद्धरणाय सेतुः।
मा वञ्चनापरिभवो नवधूमकेतुर्-
लोकस्य विप्लवकरः क्वचिदप्युदेतु॥

## १.१.२८. विष्णुपदभट्टाचार्यः(१) (१८९३-१९६५)

राखालदासन्यायरत्नस्य पौत्रो विष्णुपद उपेन्द्रनाथभट्टाचार्य-भुवनेश्वरीदेव्योः